Digitization by eGangotri-South Center

[एकोनषष्टितमः पटलः[1]]

[गौरीव्रतविधिः]

गौरीव्रतं प्रवक्ष्यामि शृणु त्वं तत्प्रभञ्जन ।

[2]अकालमृत्युशमनं [3]सर्वसौभाग्यदायकम् ॥ १॥

सर्वशत्रुप्रशमनं सर्वैश्वर्यप्रदायकम् ।

अभीष्टफलदं नित्यं सत्यं सत्यं प्रभञ्जन ॥ २॥

[व्रतकालः]

श्रावणे पूर्वपञ्चम्यां [4]प्रोष्ठे पूर्वत्रयोदशी ।

[5]अश्विनी पूर्वनवमी कार्तिके पूर्वसप्तमी ॥ ३॥

[6]आर्द्रामासे तु पूर्णायां पुष्ये पूर्वचतुर्दशी ।

[7]माघे त्वपरपञ्चम्यां फाल्गुने [8]त्वपराष्टमी ॥ ४॥

चैत्रे [9]कृष्णदशमी तु वैशाखे कृष्णसप्तमी ।

ज्येष्ठे पूर्वद्वितीयायाम् आषाढे तु सिताष्टमी ॥ ५॥

अथवा [10]गौरीनक्षत्रे मासे मासे विशेषतः ।

[11]गौरीव्रतमनुष्ठेयं विधिनानेन यत्नतः ॥ ६॥

---

[1] अयं पटलः अ (टि.१९१, पृ० ३२३-३२६), ई (टि.३६, पृ० २३९-२४२), ऊ (टि.३८, पृ० ७१९-७२१), ऋ (टि.९७, पृ० २६७-२७०), झ (टि.१०१६, पृ० ६८-७१) इत्येतेषु कोशेषु दृश्यते।

[2] अकालमृत्युशमनं] अ, ऋ; अकालमृत्युजयदं – ई; अकालमृत्युशयनं – ऊ; अकाले मृत्युशमनं – झ.

[3] सर्व०] अ, ऊ, ऋ; पुत्र० – ई, झ.

[4] प्रोष्ठे पूर्व०] अ, ई, ऋ, झ; प्रोष्ठपूर्वे – ऊ.

[5] 'आश्विने पूर्वनवम्या' इति चेत् साधु.

[6] आर्द्रा०] ई, ऊ, ऋ; आर्द्र० – अ, झ.

[7] माघे] अ, ई, ऊ, ऋ; मघे – झ.

[8] त्वपराष्टमी] ई, ऊ, ऋ, झ; तु पराष्टमी – अ.

[9] 'कृष्णदशम्यां' इत्येव साधु.

[10] गौरी०] सं० पा०; गौरि – अ, ई, ऊ, ऋ, झ.

[11] गौरीव्रत०] अ, ई, झ; गौरीघृत० – ऊ.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

[1]प्रोक्षणान्ते विशेषेण [2]उत्सवं सम्यगाचरेत्॥ २२॥

[3]एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्॥ २२ १/२॥

॥इति सूक्ष्मशास्त्रे गौरीसंप्रोक्षणविधिः[अष्टपञ्चाशत्] पटलः[4]॥

---

[1] प्रोक्षणान्ते] अ[१], ई[१-२], ऊ, ऋ[१-२], ज, झ; प्रोक्ष्यान्ते तु – अ[२].

[2] उत्सवं] अ[२], ई[१-२], ऋ[२], झ; चोत्सवं – अ[१], ऊ, ऋ[१]; उत्सव्यं – ज.

[3] अ[१], ई[१], ऊ, ऋ[१], ज' मातृकासु '२२ पू०' न दृश्यते।

[4] अ[२]: इति सूक्ष्मशास्त्रे गौरीसंप्रोक्षणविधिस्सप्तपञ्चाशत्पटलः॥; ई[२]: इति सूक्ष्मशास्त्रे गौरीसंप्रोक्षणविधिद्विपञ्चाशत्पटलः॥; ऊ: सूक्ष्मागमे गौरीसंप्रोक्षणविधिपटलो पञ्चपञ्चाशतिः॥; ऋ[२]: इति सूक्ष्मशास्त्रे गौरीसंप्रोक्षणविधिः सप्तपञ्चाशः पटलः॥; ज: इति सूक्ष्मशास्त्रे गौरिसंकोचविधिं द्विचत्वारिंशत्पटलः॥; झ: इति सूक्ष्म... गौरिसंप्रोक्षणं नाम अष्टषष्टिपटलः॥

CC-0. In Public Domain. Cuddalore Collection. TN.